© 2015 IJSRSET | Volume 1 | Issue 3 | Print ISSN : 2395-1990 | Online ISSN : 2394-4099

# भारतीयज्योतिषशास्त्रस्य स्वरूपम्



**डॉ. रामदासशर्मा**
सहायकाचार्यः, ज्योतिषविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीरणवीरपरिसरः , कोट-भलवालः,जम्मूः

उपोद्घातः – मनुजस्य कर्मणामाधारो वेद एव । वेदोऽखिलः कर्ममूलम् इति सम्मतम् । स वेदः अणोरणीयान्महतोमहीयान् इति परमात्मस्वरूपस्य निः श्वाससम्भूतो।स्ति, सः आधिभौतिकाधिदैविकाध्यात्मिकेभ्यः त्रिविधदुःखेभ्यः प्राणिनः उद्धरते। पुनश्च धर्मार्थकाममोक्षेति चतुर्विधपुरुषार्थस्य प्राप्तेरतिशयः सुन्दरः पथप्रदर्शको वर्तते। तस्मिन् वेदे संसारस्य समस्तं विज्ञानमपि सन्निहितमस्ति। भारतीयमान्यतानुसारेण यत् किमपि वेदेषु विद्यते तदेवान्यत्रापि वर्तते, यत् वेदेषु नास्ति तदन्यत्रापि नास्ति । यथा- यदिहस्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।

तस्यैव वेदस्य प्रयोजनं साधयितुं षड् वेदाङ्गशास्त्राणि सन्ति । तेषु सन्निहितमुपासितं वा ज्ञानं वेदपुरुषस्य स्वरूपे अस्माकं समक्षं प्रकटितमस्ति। तानि महर्षिभिः स्वातीन्द्रियशक्त्या लोककल्याणार्थं प्रवर्तितानि । एतेषु वेदाङ्गशास्त्रेषु ज्योतिषमतिमहत्त्वपूर्णं सम्मतम् । महर्षिणा लगधेन इदं कालज्ञानं कालविधानशास्त्रं वापि कथितम् । वस्तुतस्तु प्रधानप्रतिपाद्यविषयो।स्य काल एवास्ते ।

**मुख्यशब्दः –** नारदसंहिता, ज्योतिषशास्त्र, भारतीय, वेदः।

IJSRSET18410136 | Received: 10 June 2015 | Accepted: 25 June 2015 | May-June 2015 [ (1) 3 : 400-408 ]

नारदसंहितानुसारेण ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरेति स्कन्धत्रयं प्रसिद्धम् । वराहमिहिरेणापि ज्योतिषस्यानैकेषु भेदेषु प्रमुखमुक्तं भेदत्रयमेव स्वीकृतम् । सम्प्रति उक्तेषु भेदेषु सिद्धान्तसंहितयोरपेक्षया होरा-स्कन्धस्य परम्परा सर्वसुलभत्वात् समस्तप्राणीनां व्यक्तिगतस्तरे समस्यानिदानभावनया विकासोन्मुखा प्रतिभाति फलस्वरूपेण ज्योतिषशास्त्रस्य पर्यायरूपे होरास्कन्धस्य प्रयोगः सर्वत्र द्रष्टुं शक्यते। अधोलिखितेषु उक्तभावनायाः अभिव्यक्तिः सम्यक्तया अवगन्तुं शक्या-

**शुभाशुभफलादेशो ज्योतिःशास्त्रप्रयोजनम् ।**

**स च लग्नबलाधीनः कथितः पूर्वसूरिभिः।।**

**भचक्रस्य समाभागा उक्ता द्वादशराशयः।**

**राशीनामुदयो लग्नं ते तु मेष-वृषादयः।।**

**अप्रत्यक्षाणि शास्त्राणि विवादास्तत्र केवलम्।**

**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।।**

वस्तुतः ज्योतिषज्ञानमेकं विज्ञानमस्ति, केवलम् आगमादेशो नास्ति। इदं ज्ञानं वेदेषु यस्य प्रयोजनस्याधीने प्रस्तुतम् , अद्यापि तत्प्रयोजनं तेनैव ज्ञानेन पूर्णं जायमानमस्ति । ज्यौतिषम् अद्यापि सूर्यं स्व-मौलिकं विषयं मनुते । तं विना शास्त्रस्यास्य कल्पना एव व्यर्थं भविष्यति।

सूर्येणानुशासितं भगोलस्थपिण्डानां समूहं विद्वांसः सौरमण्डलं वदन्ति,तस्य सौरमण्लस्य सौरपरिवारस्य वा अध्ययनं प्रभावाङ्कनश्च ज्योतिषशास्त्रस्य प्रतिपाद्यो विषयो।स्ति । शास्त्रमिदं ह्यदृष्टव्याख्यानप्रसङ्गे पूर्वजन्मादीनां विवेचनं कृत्वा स्वज्ञानस्य तादात्मयम् इहलोकेन सह अन्यलोकैरपि (सौरमण्लैः) संस्थापयति । अत इदं वक्तुं शक्यते यत् समस्तब्रह्माणस्थपदार्भाणां सूक्ष्मं सार्थकं च विवेचनं ज्योतिषशास्त्रस्योद्देश्यमस्ति। अपि चाद्यन्तहीनसृष्टेर्भेदं ज्ञातुं तस्य समीपं वा गन्तुं ज्योतिषशास्त्रं सामर्थ्यवदस्ति। तस्य भेदं सम्यक् ज्योतिषं जानाति यः गुप्तः सुप्तो वा भूत्वापि सृष्टेः सञ्चालनं कुर्वन् अस्ति।

व्यवहारशास्त्रम्- -इदं हि ज्योतिषं व्यवहारशास्त्ररूपे लोके प्रतिष्ठितं वर्तते, यतोहि संक्रान्तिज्ञानम्, ग्रहसञ्चारज्ञानम्, ग्रहणज्ञानम्, षोडशसंस्कार्थसमुचितकालज्ञानम्, शुभाशुभकालनिर्णयादिकार्यमिदं प्रत्यक्षं सिद्धमपि करोति। लोके।न्यशास्त्राणि अप्रत्यक्षानुमानयोराश्रितं विषयं प्रतिपादयन्ति, परन्तु ज्योतिषशास्त्रं घटनानां प्रत्यक्षीकरणमपि ज्ञापयति। यथा- अमुककाले ग्रहणं भविष्यति इति कथितं चेत् तस्मिन् काले

ग्रहणेन भवितव्यम्। अतः वक्तुं शक्यते यत् ज्योतिषं प्रत्यक्षानुभूतिं प्रदातृ-व्यवहारशास्त्रमस्ति। भूतभविष्यत्वर्तमानानां प्रत्यक्षानुभूतिपरकं कथनं तस्य प्रतिपाद्यमस्ति।

ज्यौतिषं मूलतः अध्यात्मशास्त्रस्य स्वरूपे लोकस्य समक्षं प्रकटी भवति। इदं प्राणीनां समस्यानिष्कृतेः मार्गं ग्रहप्रभावाणां मूल्याङ्कनेन प्रशस्तं कृत्वा पुरुषार्थचतुष्टयं प्राप्तुं साहाय्यं कुरुते।

**नारदमतेन** – ब्रह्मा शास्त्रस्यास्य प्रणयनं तन्निमितं चकार येन समग्रश्रौतस्मार्तकर्मणां सम्पादनं जगज्जनः सविधिकर्तुं सक्षमः स्यात् तस्य च सर्वविधं कल्याणमपि भवतु। यथा हि-

**विनैतदखिलं श्रौतस्मार्तं कर्म न सिद्धयति।**

**तस्माज्जद्धितायेदं ब्रह्मणा रचितं पुरा।।**

पुनश्चाग्रेऽपि ज्योतिषशास्त्रस्य रहस्यं प्रकटयन् श्रीनारदः ख्यापयति- स्वर्णगर्भात् ब्रह्मणः ज्यौतिषमिदमागतमस्ति । अर्थात् सृष्टेरादौ यदा प्राकृतिकशक्तिबीजस्य वपनं जातं तदा।न्धकारावृतः स्वर्णिमगोलाकारः पिण्डः समुद्भूतः । स च पिण्डः प्रथमानिरूद्धस्याकृतौ परिवर्तितो।भवत् , तस्य नाम वेदे सूर्यः निगदितम् । सः सृष्टौ प्रथमसम्भवत्वात् आदित्यः कथितः । अनेन स्पष्टं भवति यत् सृष्टौ आदिमं सूर्यस्याविर्भावः सञ्जातः, ततश्च तेन निर्देशितस्य ब्रह्मणरूत्पत्तिः समजायत । अतः ब्रह्मणा सृष्टेरनन्तरं जनकल्याणभावनया इदं शास्त्ररूपज्ञानं मुनिभ्यः ऋषिभ्यश्च प्राददात् । तस्मात् शास्त्रमिदं जगत्प्रसिद्धं बभूव । यथा हि-

**ज्योतिःशास्त्रं स्वर्णगर्भात् ज्ञात्वा ब्रह्मा ततो मुनीन्**

**अध्यापयामास । पुनस्तैः पृथिव्यां प्रकाशितम् ।।**

वेदाय ज्योतिषशास्त्रस्यावश्यकतां महत्त्वं वा स्पष्टीकर्तुं भास्कराचार्यस्य भावना इत्थं प्रदर्शिता –

वेदास्तावद्यज्ञकर्मप्रवृता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तस्मात् ।

अत्र हि श्रीमान्भास्कराचार्यः सिद्धान्तशिरोमणिः मध्यमाधिकारे ज्योतिषशास्त्रं वेदाङ्गरूपे प्रतिष्ठितवान्। वेदाङ्गज्यौतिषे।पि इत्थं भणितम् –

**वेदा हि यज्ञार्थमभिप्रवृत्ता कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वे से वेद यज्ञम्।।**

वृद्धवशिष्ठेनापि वेदाङ्गमुख्यत्वमितः प्रसिद्धमिति कथिमस्ति । वशिष्ठसंहितायां ज्योतिषशास्त्रस्य वेदाङ्गत्वं अनेन प्रकारेण प्रकटितम् –

**क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते क्रतवो निरूक्ताः ।**

**शास्त्र—मुस्मात् किल काल बोधो वेदाङ्गतामुष्य ततः प्रसिद्धाः ।।**

ज्यौतिषशास्त्राय सिद्धान्तशेखरेऽपि उपरोक्तसमभावनायाः अभिव्यक्तिर्जाता ।

प्रकृतस्य हि ज्योतिषशास्त्रग्रन्थेषुस्वपत्यानत्ययोगानां प्रयोगात्मकमध्ययनम् इति शोधकार्यस्य विषये ज्योतिषशास्त्रस्य स भागो।त्रोदीरितः । अस्य हि ज्योतिः शास्त्रे नैकेग्रन्थाः समुपलब्धाः सन्ति ते चाग्रे ज्योतिषशास्त्रस्य स्वरूप-प्राचीनतादिनिरूपणकाले चर्चिताः भविष्यन्ति। सत्स्वापि तेषु नैकेषु ग्रन्थेषु अपत्यानपत्योः विषये अधिकं नोपलभ्यते । केचन एव चिताः ज्योतिषग्रन्थाः सन्ति येषु अपत्य-अनपत्ययो विचारः कृतः । अतः प्रकृते शोधप्रबन्धे ते ग्रन्थाः परिशीलिताः, अपत्यानपत्ययोगानां विषये च प्रयोगः साधितः।

ज्योतिषशास्त्रे नैकेषां भागानां विधानं कृतमस्ति । सन्तानभागस्य विश्लेषणाय सप्तमांशचक्रस्य विश्लेषणे।पि विचारः विधीयते । मूलरूपेण जन्माङ्गे ग्रहाणामंशाः कस्मिन् नक्षत्रे संस्थिताः सन्ति तथा च नवांशे ग्रहाणां का भूमिका अस्ति, चलितचक्रे च ग्रहाणां कीदृशी गतिरस्ति इत्यादिषु सम्यक् विचार्य एव अन्तिमनिष्कर्षं प्रति गमनप्रयासः समुचितो।स्ति। संतानपक्षस्य विश्लेषणपरिधौ यदि सप्तमांशमपि स्थापयामश्चेत् निश्चयेन भ्रमो भवति। तेन भ्रमेण निष्कर्षे त्रुटेः सम्भावना प्रबला भविष्यति। नवमांशे विचारः नितान्तमावश्यको।स्ति यतोहि अस्माकं सर्वैरेव ऋषिभिः मनीषिभिः सर्वसम्मानितज्योतिर्विदभिः नवमांशस्योपयोगिता,स्वाध्ययनानुभानुसन्धानानांश्चाधारेण आवश्यकी सम्मता । मनुष्यः सन्ततिरुपे स्वहार्दिकी, अव्यक्ताः अतृप्तकामनाश्च पूरयितुमिच्छति । स्वजीवने याः याः इच्छाः कामनाश्च मनुष्यः स्वयं पूर्णाः कर्तुमसमर्थः भवति ताः अतृप्ताः अपूर्णाश्च कामनाः स्वसन्ततिमाध्यमेन पूर्णमानाः जायमानाः द्रष्टुमिच्छति । आन्तरिकरूपे प्रत्येकं व्यक्तौ (विशिष्टभारतीयेषु) इयं हार्दिकी आकाङ्क्षा भवति यत् स स्वनिधनस्यानन्तरं किमपि एतादृशमभिज्ञानं चिह्नं वा संसारे त्यजेत् यत् तस्य गमनानन्तरमपि तस्य नाम परम्परां च अक्षुण्णां स्थापयेत् –

**स जातो येन जातेन याति वंशः समुन्नतिम् ।**

**परिवर्तिनि संसारे मृतः को वा न जायते ।।**

एषा एवोत्कटाकाङ्क्षा मनुष्यं सन्ततिप्राप्तये विशिस्य पुत्रं प्राप्तुं सततमनुप्रेरितं करोति। बृहत्संहितानुसारेण पुत्ररुपे व्यक्तेः स्वात्मन एवोत्पत्तिः जायते- एवं हि आत्मा जायते स्त्रीषु भूयः भगवान् श्रीकृष्णः पुत्रस्य महिमानं वर्णयन् कथयति- यदि मनुष्याय मोक्षः न प्राप्यते तर्हि पुत्रः नरकात् तस्योद्धारं करोति । पुम् नाम्नो नरकात् त्रायते इति पुत्रः । अत एवोच्यते यत पुत्रः पौत्राश्च मृताय प्राणिने स्कन्धं दद्यात्, तथा च तस्य यथाविधमग्निदाहं कुर्यात्। महर्षिः मनुरपि कथयति- पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते अर्थात् पुत्रेण लोकान् जेतुं शक्यते पौत्रेण चाननन्दस्य प्राप्तिर्जायते।

विभिन्नोदेश्यानां हेतवे पुत्रस्य कामना अनुचिता नास्ति, परन्तु मातृशक्तिः स्त्रीजातेः प्रतिष्ठा कथमपि न्यूना न मन्तव्या । निःसन्देहं पुत्रः पुत्री च उभावपि परस्परं पूरकौ भवतः । वैयक्तिकस्तरे उभौ ईश्वरस्य प्रकृतेश्च श्रेष्ठतमौ रचने मन्येते।

गृहस्थजीवनमेकमुपवनमस्ति अस्मिन् सन्ततयः वृक्षेषु फलपुष्पवद् भवन्ति येन वृक्षैः सार्थकता प्राप्तयते । संसारे तादृशौ दम्पती न स्तः ययोः सन्ततेरिच्छा न स्यात् । सर्वे श्रेष्ठं योग्यं प्रतिभावन्तश्च सन्तानमभिलषन्ति । सर्वे इच्छन्ति यत्तेषां पुत्रः कुलदीपको भूत्वा तेषां वृद्धावस्थायाः आश्रयो भूयात् शास्त्रोक्तिरपि वर्तते- शोकप्रदायकानां हृदयदाहकानां नैकपुत्राणां जन्मना को लाभः कुलाय आश्रयवान् सुबोधः बुद्धिमान् एक एव पुत्रः श्रेष्ठो।स्ति , यस्याश्रये सम्पूर्णः परिवारः सुखम्भुङ्क्ते । तथा हि –

**किं जातैः बहुभिः पुत्रैः शोकसन्तापकारकैः ।**

**वरमेकः कुलावलम्बी यत्र विश्रायते कुलम् ।।**

शास्त्रानुसारं श्रेष्ठसन्तानस्य प्राप्तिः ईश्वरकृपां विना नैव भवति। अपि च ईश्वरस्य कृपा तस्य भक्तिं विना व्रतोपासनां विना जपतपसी विना च नैव प्राप्यते । यथा-

**व्रतोपवासैः विष्णुर्नाऽन्यजन्मनि तोषितः ।**

**ते नराधमापत्यसुखहीना ग्रहरोगादिवादिनः।।**

ज्यौतिषश्शास्त्रमेकं सूचनात्मकं शास्त्रमस्ति। अस्माभिः शास्त्रेऽस्मिन् प्रतिपादितानां ग्रह-नक्षत्र राश्यादीनां विश्लेषणात्मकमनुशीलनानन्तरमेव सन्तानस्य जन्मविषये अन्तिमः निर्णयः ग्रहितव्यः ।

अस्य हि संस्कृतवाङ्गमयस्य विस्तृतं सुसमृद्धश्च कलेवरं सर्वानपि विस्मापयति । तत्र विश्वस्यादिमज्ञानपुञ्जस्य वेदस्यैकं महत्त्वपूर्णमङ्गमस्ति खलु ज्योतिषशास्त्रं नाम । महर्षिणा भास्कराचार्येण यथोक्तम् –

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं**

**मुख्यता चाङ्गमध्ये।स्य तेनोच्यते।**

**संयुतोऽपीतरैः कर्णासादिभिः**

**चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।**

वस्तुतस्त्वपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यते तानि सर्वाण्येव ज्योतिः शब्देनोच्यन्ते । आकाशे प्रसृताः तारकपुञ्जाः ज्योतिरूपाः प्रकाशन्ते । एते प्रकाशमानतारकपुञ्जाः स्वस्वच्छकिरणैः भूमिस्थप्राणीनां हृद्यानि समाप्लावयन्तः रहस्यमयाः प्रतीयन्ते । मानवः आदिकालादेवैतेषां तारकाणां रहस्यान् ज्ञातुं प्रयासरतो जातः । एतेषां विषये बहुकिञ्चिद् ज्ञातमस्ति, परन्तु ज्ञातरहस्येभ्योप्यधिकान् रहस्यानमधुनापि अज्ञाता एव सन्ति । तपःपूता ऋषयो महर्षयः स्वकीययोगजदृस्येदं सुनिश्चितवन्तः यत् आकाशस्थ प्रकाशमानतारकपुञ्जाः (पिण्डानि) उभयोः रूपयो दरीदृश्यन्ते । केचन तु स्वस्थानं परिवर्तन्ते, अन्ये च पिण्डाः सदैव ह्येकस्यामेव स्थित्या विद्यमानाः परिभ्रमन्ते । येषु किमपि परिवर्तनं न दृश्यते, तेषां नक्षत्रसंज्ञा भवति। अस्यैव निरुक्तकारो यास्कः निर्वचनं कुरूते यत् न क्षतेः गति कर्मणः । ये च प्रकाशमानपिण्डाः परिवर्तनं कुर्वन्तः प्रतीयन्ते तेषां ग्रहसंज्ञा वर्तते –

गृह्णन्ति इति ग्रहाः । अर्थात् ये नक्षत्राणि गृह्णवन्तः चलन्ति ते ग्रहाः भवन्ति। नक्षत्रग्रहणेन सह एते ग्रहगणाः जागतिकसमस्तपदार्थानपि गृह्णन्ति। एतेषां ज्योतिर्मयग्रहनक्षत्रादिपिण्डानां सम्यग् बोधकं शास्त्रं हि ज्योतिषशब्देन अभिधीयते। एतान्येव ग्रहनक्षत्राणि ज्योतिषशास्त्रस्य मूलानि सन्ति ।

## ज्योतिषशास्त्रस्य व्युत्पत्तिः –

ज्योतिष शब्दस्य व्युत्पत्तिः द्युतेरिसिन्नादेश्च इति उक्त्वा कृताऽस्ति। द्युत् दीप्तौ इति धातुना इसिन् प्रत्ययेन दकारञकारादेशं विधाय च ज्योतिष् ज्योतिः शब्दः आविर्भूत्। पुनश्च अर्श आदिभ्योऽच् इत्यनेन अचि कृते सति अकारान्त ज्योतिष शब्दः निर्मितः। पुनश्च तदधिकृत्य कृतो ग्रन्थः इत्यनेन पाणिनीयसूत्रेण ज्यौतिष शब्दो निष्पन्नो भवति, यस्यार्थो भवति ज्योतिषसम्बन्धी सिद्धान्तो ग्रन्थो वा। शास्त्रशब्दस्य व्युत्पत्तिः द्विधा प्रक्रियते –

(1.) शासनात् शास्त्रम् अर्थात् करणीयाकरणीययोः कर्तव्याकर्तव्ययोश्च विषये यदाज्ञापयति, तच्छास्त्रमस्ति।

(2) शास्त्रत्वं शंसनादपि अर्थात् यः केनापि उद्देश्यविशेषेण सम्पूर्णार्थानां ज्ञानं कारयति तन्नाम शास्त्रमस्ति। उभयोः व्युत्पत्योराधारेण वक्तुं शक्यते यत् यः कस्यचिद्वस्तुनः स्वरूपं सम्यक्तया अवगमयेत्, अर्थात् यः सत्यस्य ज्ञानं कारयेत्, तन्नामशास्त्रमिति। अतश्च ज्योतिषशास्त्रस्य अर्थो जातः – ग्रहनक्षादिप्रकाशपिण्डानां माध्यमैः सत्यस्य ज्ञानमज्ञानादीनां च निवृत्तिः।

मीमांसकाः वदन्ति यत् औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः अर्थात् शब्दार्थो सहैव प्रकिटतवन्तौ। शब्दस्योत्पत्या सह अर्थोऽपि उत्पद्यते। अनेन नियमेन ऋषयः नक्षत्राणां, ग्रहाणां राशीनां च ज्योतिरितिनामकरणं कृतवन्तः। आकाशे येषां तारापुञ्जानामाकृतिः घोटकमुखसदृशी दृग्गोचरीभूता, तस्याः नाम अश्विनी इति जाता। येषां नक्षत्रसमूहानां योनिसदृशाकृतिर्जाता तेषां नाम भरणी इति। मृगस्य शिरः प्रतीतत्वान्मृगशिरा इति नाम जातम्। इत्थं 27 नक्षत्राणां नामानि तेषां देवान् च ऋषियः योगजप्रत्यक्षेण ज्ञातवन्तः, तथा च तेषामुल्लेखं यथास्थानं वैदिकसाहित्ये कृतवन्तः सन्ति।

**ग्रहाः राशयश्च-**

अनेनैव प्रकारेणाकाशे चरणकारणात् ग्रहाः खेचराः कथिताः। यथा सूर्यः सरणं कुर्वन् प्रतिभाति, अत एव सरणात् इति सूर्यः। सूर्यः आत्मा कथितो।स्ति, मनसे आह्लादकतां च प्रदानत्वाच्चचन्द्रमसः मनस्संज्ञा जाता। चन्द्रमा समष्टेः मनो वर्तते। चन्द्रमस्य समीपं तस्य पुत्रः बुधः अन्यान्वेषणात्परं (सूक्ष्मत्वात्) जातः। अतः स बुद्धिः वाणी वा कथितः। अत्यन्तं श्वेतत्त्वेन (सितः) शुक्रः जलीयत्त्वेन कामः कथितः। पृथ्वीसदृशगुणधर्मयुक्तत्वात् ज्वाल्यमानाङ्गारवच्च प्रतीयमानः भूपुत्रो भौमः अङ्गरको वा

कथितः । सर्वाधिको विस्तृतः पीतवर्णी च ग्रहः गुरुरिति (ज्ञानं) कथितः , शनैः शनैः गम्यमानो मन्दः शनैश्चरो वा (भृत्यः) इति नामकरणं महर्षिभिः कृतम्।

यैश्च ऋषिभिः नक्षत्रग्रहाणां नामकरणं तेषामाकृत्या कृतं, तैरेव राशीनां नामकरणं कृतम् । अस्याः सत्यता सूर्यादि-अष्टादशप्रवर्तकानामुपलब्धग्रन्थेषु अद्यापि सुरक्षिता।स्ति । अतएव एतत् कथनमुचितं नास्ति यत् मिस्र-बेबिलोन-यूनानिनो वा भारतीयेभ्यः राशिज्ञानं प्रदत्तवन्तः। ये महर्षयः आकाशे ताराणां समूहान् प्रत्यक्षीकृत्य तेभ्यः अश्विन्यादिनक्षत्रसंज्ञाः दत्तवन्तः, तैरेव सततमाकाशनिरीक्षणे यदा केषाञ्चननक्षत्राणां समूहेभ्यः विशेषाकृतयः मेष-वृषभ-स्त्रीपुरुषर्योयुग्म-कर्कादीनामिव प्रतीयमानाः जाताः तदा तेषामावश्यकतानुसारं मेषवृषभादिनामकरणं कृतम् । यथा हि राशिपर्यायः क्षेत्रम्, ग्रहम्, ऋक्षः,नक्षत्रम्, भ,भवनादिकथिताः । -

**राशिक्षेत्रगृह—मानि भवनं चैकार्थसम्प्रत्ययाः ।**

## ज्योतिषशास्त्रस्य भेदा –

आदिकाले ज्योतिषशास्त्रस्य नैके भेदाः आसन्। यथा- शकुन-स्वप्न-अङ्गस्फुरण-छिक्का-शारीरिकलक्षणानि च । एतदतिरिक्तं हस्तरेखाविज्ञानम्, सामुद्रिकशास्त्रम्, नाडीज्ञानम्,स्वरविज्ञानादिनैके भेदाः प्रकीर्तिताः आसन् । किन्तु नारदगर्गादीनामाचार्याणां कालं यावत् एतत् त्रिषु स्कन्धेषु विभक्तमभूत्। सर्वे च भेदाः एतेस्वेव भेदेषु अन्तर्निहिताः जाताः । एताः ज्योतिषशास्त्रस्य तिस्रः शाखाः प्रसिद्धाः –

1. **गणितज्योतिषम् (सिद्धान्तज्योतिषम्) ।**
2. **फलितज्योतिषम् अथवा जातकम् (होरा) ज्योतिषम् ।**
3. **संहिताज्योतिषम् ।**

तत्र हि सिद्धान्तज्योतिषस्य मुख्यं प्रयोजनं कालस्य गणना ग्रहनक्षत्राणां गतेः सूक्ष्ममध्ययनं च । फलितज्योतिषद्वारा भूलोके प्राणीनां जन्मतो मृत्युपर्यन्तं जायमानानां शुभाशुभफलविवेचनम्। येन प्राणीनां लोकयात्रायाः वर्णनं जायते। संहिताज्योतिषस्य मुख्यं ध्येयं विश्वस्मिन् जायमानः भूकम्पः, भूस्खलनम्,ज्वालामुखी,यान-दुर्घटना,चक्रवात, वातावरणस्यानुकूलताप्रतिकूलताभिः सह समस्तदिव्यान्तरिक्षभौमाद्युत्पातानां बोधनम् ।

## सन्दर्भग्रन्थसूची –


1. भारतीयज्योतिषम् – नैमीचन्द्र शास्त्रीकृत, ।
2. भारतीयज्योतिषम् –श्री बालकृष्णदीक्षितविरचितम् ।
3. सिद्धान्तशिरोमणिः, श्रीमान्भास्कराचार्यः चौखम्बा संस्कृत संस्थान, वाराणसी ।
4. नारदसंहिता – महर्षिनारदविरचितं , मोती लाल वाराणसी , नई- दिल्ली ।
5. बृहज्जातकम् –दैवज्ञवहारमिहिर विरचितः, चौखम्बा संस्कृत संस्थान, वाराणसी ।
6. ज्योतिषरत्नमाला-श्रीवतिभट्टकृत सम्पादकः, डॉ.बिहारीलालवासिष्ठः, श्री रणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मूः ।
7. मुहूर्तमार्तण्डः – दैवज्ञनारायण विरचितौ , चौखम्बा विद्याभवन, वाराणसी ।
8. भर्तृहरि शतकत्रयम् - चौखम्बा संस्कृत संस्थान, वाराणसी ।